# Shri Uma Devi Mahima The manifestation of Uma

# શ્રીઉમાદેવીમહિમા અથવા ઉમાપ્રાદુર્ભાવવર્ણનમ્

## Document Information

Text title : umAmahimA The manifestation of Uma with Hindi English translation

File name : umAmahimA.itx

Category : devii, pArvatI, devI

Location : doc_devii

Transliterated by : Akash Pandeya, NA

Proofread by : Akash Pandeya, NA

Description/comments : shivapurANa, umAsaMhitA, adhyAya 49 verses 27-39

Latest update : June 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 25, 2021

*sanskritdocuments.org*

# શ્રીઉમાદેવીમહિમા અથવા ઉમાપ્રાદુર્ભાવવર્ણનમ્

મુનય ઊચુઃ ।
ઉમાયા ભુવનેશાન્યાસ્સૂત સર્વાર્થવિત્તમ ।
અવતારં સમાચક્ષ્વ યતો જાતા સરસ્વતી ॥ ૧॥

યા ગીયતે પરબ્રહ્મમૂલપ્રકૃતિરીશ્વરી ।
નિરાકારાપિ સાકારા નિત્યાનન્દમયી સતી ॥ ૨॥

સૂત ઉવાચ ।
તાપસાઃ શ◌ૃણુત પ્રેમ્ણા ચરિત્રં પરમં મહત્ ।
યસ્ય વિજ્ઞાનમાત્રેણ નરો યાતિ પરાં ગતિમ્ ॥ ૩॥

દેવદાનવયોર્યુદ્ધમેકદાસીત્પરસ્પરમ્ ।
મહામાયાપ્રભાવેણામરાણાં વિજયોઽભવત્ ॥ ૪॥

તતોઽવલિપ્તા અમરાસ્સ્વપ્રશંસાં વિતેનિરે ।
વયં ધન્યા વયં ધન્યાઃ કિં કરિષ્યન્તિ નોઽસુરાઃ ॥ ૫॥

યે પ્રભાવં સમાલોક્યાસ્માકં પરમદુઃસહમ્ ।
ભીતા નાગાલયં યાતા યાતયાતેતિ વાદિનઃ ॥ ૬॥

અહો બલમહો તેજો દૈત્યવંશક્ષયઙ્કરમ્ ।
અહો ભાગ્યં સુમનસામેવં સર્વેઽભ્યવર્ણયન્ ॥ ૭॥

તત આવિરભૂત્તેજઃ કૂટરૂપન્તદૈવ હિ ।
અદૃષ્ટપૂર્વં તદ્દૃષ્ટ્વા વિસ્મિતા અભવન્સુરાઃ ॥ ૮॥

કિમિદં કિમિદં ચેતિ રુદ્ધકણ્ઠાસ્સમબ્રુવન ।
અજાનન્તઃ પરં શ્યામાનુભાવં માનભઞ્જનમ્ ॥ ૯॥

તત આજ્ઞાપયદ્દેવાન્દેવાનામધિનાયકઃ ।
યાત યૂયં પરીક્ષધ્વં યાથાતથ્યેન કિન્વિતિ ॥ ૧૦॥

સુરેન્દ્રપ્રેરિતો વાયુર્મહસઃ સન્નિધિં ગતઃ ।
કસ્ત્વં ભોરિતિ સમ્બોધ્યાવોચદેનં ચ તન્મહઃ ॥ ૧૧॥

ઇતિ પૃષ્ટસ્તદા વાયુર્મહસાતિગરીયસા ।
વાયુરસ્મિ જગત્પ્રાણસ્સાભિમાનોઽબ્રવીદિદમ્ ॥ ૧૨॥

જઙ્ગમાજઙ્ગમં સર્વમોતપ્રોતમિદં જગત્ ।
મય્યેવ નિખિલાધારે ચાલયામ્યખિલં જગત્ .. .. ૧૩॥

તદોવાચ મહાતેજઃ શક્તોઽસિ યદિ ચાલને ।
ધૃતમેતત્તૃણં વાયો ચાલયસ્વ નિજેચ્છયા ॥ ૧૪॥ ।

તતઃ સર્વપ્રયત્નેનાકરોદ્યત્નં સદાગતિઃ ।
ન ચચાલ યદા સ્થાનાત્તદાસૌ લજ્જિતોઽભવત ॥ ૧૫॥

તૂષ્ણીં ભૂત્વા તતો વાયુર્જગામેન્દ્રસભાં પ્રતિ ।
કથયામાસ તદ્ વૃત્તં સ્વકીયાભિભવાન્વિતમ્ ॥ ૧૬॥

સર્વેશત્વં વયં સર્વે મૃષૈવાત્મનિ મન્મહે ।
ન પારયામહે કિઞ્ચિદ્વિધાતું ક્ષુદ્રવસ્ત્વપિ ॥ ૧૭॥

તતશ્ચ પ્રેષયામાસ મરુત્વાન્સકલાન્સુરાન્ ।
ન શેકુસ્તે યદા જ્ઞાતું તદેન્દ્રઃ સ્વયમભ્યગાત્ ॥ ૧૮॥

મઘવન્તમથાયાન્તં દૃષ્ટ્વા તેજોતિદુઃસહમ્ ।
બભૂવાન્તર્હિતં સદ્યો વિસ્મિતોઽભૂચ્ચ વાસવઃ ॥ ૧૯॥

ચરિત્રમીદૃશં યસ્ય તમેવ શરણં શ્રયે ।
ઇતિ સઞ્ચિન્તયામાસ સહસ્રાક્ષઃ પુનઃપુનઃ ॥ ૨૦॥

એતસ્મિન્નન્તરે તત્ર નિર્વ્યાજકરુણાતનુઃ ।
તેષામનુગ્રહં કર્તું હર્તું ગર્વં શિવાઙ્ગના ॥ । ૨૧॥

ચૈત્રશુક્લનવમ્યાં તુ મધ્યાહ્નસ્થે દિવાકરે ।
પ્રાદુરાસીદુમા દેવી સચ્ચિદાનન્દરૂપિણી ॥ ૨૨॥

મહોમધ્યે વિરાજન્તી ભાસયન્તી દિશો રુચા ।
બોધયન્તી સુરાન્સર્વાન્બ્રહ્મૈવાહમિતિ સ્ફુટમ્ ॥ ૨૩॥

ચતુર્ભિર્દધતી હસ્તૈર્વરપાશાઙ્કુશાભયાન્ ।
શ્રુતિભિસ્સેવિતા રમ્યા નવયૌવનગર્વિતા ॥ ૨૪॥

રક્તામ્બરપરીધાના રક્તમાલ્યાનુલેપના ।
કોટિકન્દર્પ્પસઙ્કાશા ચન્દ્રકોટિસમપ્રભા ॥। ૨૫॥

વ્યાજહાર મહામાયા સર્વાન્તર્ય્યામિરૂપિણી ।
સાક્ષિણી સર્વભૂતાનાં પરબ્રહ્મસ્વરૂપિણી ॥ ૨૬॥

(અથ ઉમામહિમા ।)
ઉમોવાચ ।
ન બ્રહ્મા ન મુરારાતિર્ન પુરારાતિરીશ્વરઃ ।
મદગ્રે ગર્વિતું કિઞ્ચિત્કા કથાન્યસુપર્વણામ્ ॥ ૨૭॥

પરં બ્રહ્મ પરં જ્યોતિઃ પ્રણવદ્વન્દ્વરૂપિણી ।
અહમેવાસ્મિ સકલં મદન્યો નાસ્તિ કશ્ચન ॥ ૨૮॥

નિરાકારાપિ સાકારા સર્વતત્ત્વસ્વરૂપિણી ।
અપ્રતર્ક્યગુણા નિત્યા કાર્યકારણરૂપિણી ॥ ૨૯॥

કદાચિદ્દયિતાકારા કદાચિત્પુરુષાકૃતિઃ ।
કદાચિદુભયાકારા સર્વાકારાહમીશ્વરી ॥ ૩૦॥

વિરઞ્ચિઃ સૃષ્ટિકર્તાહં જગત્પાતાહમચ્યુતઃ ।
રુદ્રઃ સંહારકર્તાહં સર્વવિશ્વવિમોહિની ॥ ૩૧॥

કાલિકા કમલાવાણી મુખાસ્સર્વા હિ શક્તયઃ ।
મદંશાદેવ સઞ્જાતાસ્તથેમાસ્સકલાઃ કલાઃ ॥ ૩૨॥

મત્પ્રભાવાજ્જિતાસ્સર્વે યુષ્માભિર્દ્દિતિનન્દનાઃ ।
તામવિજ્ઞાય માં યૂયં વૃથા સર્વેશમાનિનઃ ॥ ૩૩॥

યથા દારુમયીં યોષાં નર્તયત્યૈન્દ્રજાલિકઃ ।
તથૈવ સર્વભૂતાનિ નર્તયામ્યહમીશ્વરી ॥ ૩૪॥

મદ્ભયાદ્વાતિ પવનઃ સર્વં દહતિ હવ્યભુક્ ।
લોકપાલાઃ પ્રકુર્વન્તિ સ્વસ્વકર્માણ્યનારતમ્ ॥ ૩૫॥

કદાચિદ્દેવવર્ગાણાં કદાચિદ્દિતિજન્મ નામ્ ।
કરોમિ વિજયં સમ્યક્સ્વતન્ત્રા નિજલીલયા ॥ ૩૬॥

અવિનાશિ પરં ધામ માયાતીતં પરાત્પરમ્ ।

શ્રુતયો વર્ણયન્તે યત્તદ્રૂપન્તુ મમૈવ હિ ॥ ૩૭॥

સગુણં નિર્ગુણં ચેતિ મદ્રૂપં દ્વિવિધં મતમ્ ।
માયાશબલિતં ચૈકં દ્વિતીયન્તદનાશ્રિતમ્ ॥ ૩૮॥

એવં વિજ્ઞાય માં દેવાસ્સ્વં સ્વં ગર્વં વિહાય ચ ।
ભજત પ્રણયોપેતાઃ પ્રકૃતિં માં સનાતનીમ્ ॥ ૩૯॥

ઇતિ દેવ્યા વચઃ શ્રુત્વા કરુણાગર્ભિતં સુરાઃ ।
તુષ્ટુવુઃ પરમેશાનીં ભક્તિસન્નતકન્ધરાઃ ॥ ૪૦॥

ક્ષમસ્વ જગદીશાનિ પ્રસીદ પરમેશ્વરિ ।
મૈવં ભૂયાત્કદાચિન્નો ગર્વો માતર્દયાં કુરુ ॥ ૪૧॥

તતઃપ્રભૃતિ તે દેવા હિત્વા ગર્વં સમાહિતાઃ ।
ઉમામારાધયામાસુર્યથાપૂર્વં યથાવિધિ ॥ ૪૨॥

ઇતિ વઃ કથિતો વિપ્રા ઉમાપ્રાદુર્ભવો મયા ।
યસ્ય શ્રવણમાત્રેણ પરમં પદમશ્નુતે । ૪૩॥

ઇતિ શ્રીશિવમહાપુરાણે પઞ્ચમ્યામુમાસંહિતાયામુમાપ્રાદુર્ભાવવર્ણનં
નામૈકોનપઞ્ચાશત્તમોઽધ્યાયઃ ॥ ૪૯॥

## ઉમા કી ઉત્પત્તિ

હિન્દી ભાવાનુવાદ -
ઋષિયોંને કહા - હે સૂતજી ! અબ કૃપા કરકે ઉમાકે અવતાર કા વર્ણન કરેં જિસસે સરસ્વતી કા પ્રાદુર્ભાવ હુઆ । સૂતજી બોલે - ઋષિગણ સુનિયે, એક બાર દેવતા દૈત્યોં કા ભયાનક યુદ્ધ હુઆ । તબ માતેશ્વરી કે પ્રતાપસે દેવતા વિજયી હુએ । ઇસ કારણ દેવતાઓંકો ગર્વ હુઆ । અપની પ્રશંસા કરને લગે । તબ ઉન્હી સે એક કૂપ રૂપ તેજ પ્રકટ હા । । દેવતાઓંને જ્યોંહી ઉસ તેજકો દેખા તો બહુતહી ઘબડા ગયે ઇન્દ્રસે જાકર બોલે - વહ ક્યા હૈ ? તબ ઇન્દ્રને ઉસકી પરીક્ષા લેને કે લિયે કહા । પ્રથમ વાયુ વહાં પહુઁચા । ઉસ તેજને વાયુસે પૂછા તૂ કૌન હૈ ! વાયુ બોલા મૈં સારે જગત કા પ્રાણ હૂઁ । મેરે દ્વારા જગત ચલ રહા હૈ । સુનતે હી તેજને કહા - અચ્છા તો અપની શક્તિ સે જરા ઇસ તિનકે કો તો ચલાકર દિખાદો । તબ વાયુ

ને અપની સારી શક્તિ લગાદી કિન્તુ તિનકા તિલભર ભી ન હિલ સકા ।
વાયુ લજ્જિત હોકર ઇન્દ્રકે પાસ પહુંચા । અપની પરાજયકા સમ્પૂર્ણ
વૃત્તાન્ત સુનાયા । યહ સુનકર ઇન્દ્રને અન્ય દેવતાઓં કો ભી ઉસકી
પરીક્ષા કે લિયે ભેજા કિન્તુ વે સભી પરાજિત હો ગયે । ઇન્દ્ર સ્વયં
વહાઁ પહુંચા । ઇન્દ્રકો વહાઁ આયા જાનકર તેજ ઉસી સમય અન્તર્ધાન
હો ગયા । ઇન્દ્ર ઇસસે અત્યન્ત વિસ્મિત હુઆ । તબ ઉસ હજારનેત્રોં વાલે
ઇન્દ્રને વિચાર કિયા કિ જો ઇસ પ્રકાર કી શક્તિ રખતા હૈ, મૈં ઉસકી
શરણ મેં ક્યોં ન જાઊં? યહ સોચકર મન દ્વારા ઇન્દ્ર શરણ
કો પ્રાપ્ત હુઆ । વહ ચૈત્ર માસ કે શુક્લપક્ષ કી નવમી કા તથા
મધ્યાહ્ન કા સમય થા । ઠીક ઉસી સમય હેતુકે બિના કૃપા કરને
વાલી, સબકા અભિમાન મિટાને વાલી દેવી પ્રકટ હો ગઈ । ઇન્દ્રસે બોલી,
હે સુરરાજ ઇન્દ્ર ! બ્રહ્મા, વિષ્ણુ, શિવ આદિ ભી મેરે સામને ગર્વ
નહીં કર સકતે, તો ફિર અન્ય દેવતાઓંકી તો સામર્થ્યહી ક્યા હૈ ।
મૈં પરબ્રહ્મ પ્રણવસ્વરૂપ દેવી હૂઁ । મેરી કૃપા સે તુમ લોગોં
ન દૈત્યોં પર વિજય પાઈ હૈ । હે દેવતાગણ ! તુમ અપના અભિમાન
ત્યાગ કરકે નમ્રતાકે સાથ મેરા ભજન કરો । ઇતના સુનકર દેવતાઓં
ને પ્રણામ તથા સ્તુતિ કરકે કહા - હે મહામાયે ! અબ તો આપ ક્ષમા
કરેં । આગે ઇસ પ્રકાર કા વરદાન દેં જિસસે હમેં ફિર અભિમાન ન
હો । સૂતજી બોલે - તભી સે દેવતાઓં ને અભિમાન ત્યાગકર ઉમાદેવી કી
આરાધના પ્રારમ્ભ કર દી ।

ઇતિ ।

## The manifestation of Uma

The sages said :-

1. O Suta, the most excellent among the omniscients, please mention the incarnation of Uma, the goddess of all the worlds and the mother of Sarasvati.
2. She is sung as the primordial Prakrti of the supreme Brahman. She is both possessed and devoid of forms. She is of the form of eternal bliss. She is Sati.

Suta said :-

3. O sages, listen lovingly to the great story, the perfect knowledge of which alone helps man to attain the great goal.
4. Once there was a clash between the gods and the Asuras. Thanks to the power of the goddess the gods became victorious.
5. Then the gods were proud and haughty. They boasted- “We are blessed. What can the Asuras do to us
6. Of our unbearable prowess, the Asuras are afraid. They have gone to Patala saying, “Run, run”.
7. Then all of them proclaimed thus: “Wonderful is the strength, splendour, and good luck of the gods that has reduced the race of the Daityas.
8. Then a mass of splendour appeared, at the unprecedented sight of which the gods were surpiiscd.
9. Ignorant of the real glory and the intention of the goddess to quell their arrogance, the Asuras said with choking throats “What is this ? What is this ?”
10. Then the lord Indra ordered the gods - “Go ye all and examine it and ascertain what it is.”
11. Urged by Indra, the wind-god approached splendour and addressed it, “Who are you ?” The splendour too put the same question to him.
12. Thus asked by the big mass of splendour the wind-god replied arrogantly. - “I am Vayu the vital breath of the universe.”
13. Everything in the universe, mobile or immobile, is woven like warp and woof into me. I am the support of everything. I move the entire universe.”
14. Then the great splendour said:- “If you are competent to move, O wind-god, please move this blade of grass I have set before you. Move it as you please.”
15. Then wind-god put forth all his efforts. But the blade of grass did not stir from its position. Then he was put to shame.

16. The wind-god went silently to the assembly of Indi a.
There he narrated the details of his discomfiture.
17. “False is our pride that we are the lords. In fact we
are helpless, insignificant creatures.”
18. Then Indra sent all the gods. When they could not realise
anything Indra himself went there.
19. On seeing Indra come, the unbearable splendour vanished
immediately. Indra was surprised.
20. Then Indra thought to himself again and again - “I seek
refuge in him alone whose conduct is such as this.”
21-22. In the meantime, in order to bless them and remove
their arrogance, Siva, the embodied form of unde ceitful
mercy, existence, knowledge and bliss, manifested herself on
the ninth day of the bright half of the month Chaitra when
the sun was in the middle of the day.
23. Shining among the mass of splendour she brightened the
quarters with her brilliance. She enlightened the gods,
saying “I alone am Brahman.”
24. In her four hands she held boons, noose, goad and the
mystic gesture of protection. She was served by the Vedas and
looked beautiful and proud of her blooming youth.
25. She wore red garments and red garlands. Red sandal paste
was smeared over her body. She was as dazzling as a crore of
cupids. Her lustre was that of a crore moons.
26. The great Maya, in the form of the immanent soul of all,
the cosmic witness of all living beings, and the great
Brahman, spoke.
Uma said:-
27. Neither Brahma nor Visnu nor Siva the slayer of
the Tripura demon can bluff* before me. What about the
other gods ?
28. The great Brahman, the great light in the form of the two

Pranavas, I alone am. I am all. There is none other beside me.
29. Though devoid of form I possess forms. I constitute all principles. I am eternal and my attributes cannot be disputed. I am both the cause and the effect.
30. Sometimes I have the form of a woman, sometimes of a man. Sometimes both. I am goddess assuming all forms.
31. I am the creator, the protector and the destroyer of the world. I am the enchantress of the universe.
32. All the Saktis - Kali, Lak§mi and Sarasvati as well as others are born of my parts. So also the arts originate from me.
38. Due to my power alone the demons are conquered by you. Without knowing me of this nature you bluff as the lords of all.
34. Just as a magician makes the wooden doll of a woman dance so also I the goddess make all living beings dance.
35. Being afraid of me the wind blows, the fire- god burns and the guardians of the quarters carry on their duties.
36. Independent that I am, I sportively bestow victory on the gods sometimes and on the Daityas sometimes.
37. It is my form that is described in the Vedas as indestructible, the great abode, the one beyond Maya and that which is greater than the greatest.
38. My form is two-fold - Saguna and Nirguna. One is mixed with Maya and the other is free from it.
39. O gods, endowed with devotion, realise this and eschew your arrogance, worship me, the eternal Prakrti.
40. On hearing the merciful words of the goddess, the gods eulogised her, with their shoulders drooping with devotion.
41. O goddess of the universe, forgive us. O goddess, be pleased. O mother, let us not be arrogant again.  Please be merciful.
42. Since then the gods began to propitiate her as before.

They eschewed their arrogance and became pure in mind.

43. O Brahmins, thus I have narrated to you the menifestation of Uma. By only hearing this men attain the great region.

The end of the manifestation of Uma.

shivapurANa, umAsaMhitA, adhyAya 49 umAmahimA verses 27-39

*Shri Uma Devi Mahima The manifestation of Uma*

pdf was typeset on June 25, 2021

Please send corrections to *sanskrit@cheerful.com*